S.V. Apte, English-Sanskrit Dictionary -- 3rd ed. Pune 1920



*adv.* स्थिरचेतसा, दृढं, दृढनिश्चयेन. **-er,** *s.* निर्णयकृत् *m.*, निर्णेतृ *m.*

**Detest,** *v. t.* विद्विष् 2 U, गर्ह् 1, 10 A, गुप् desid. (जुगुप्सते) (with abl.); *See* **Abhor. -able,** *a.* जुगुप्सित, गर्हित, निंद्य, गर्हणीय, विद्वेष्य. **-ation,** *s.* गर्हा, जुगुप्सा, घृणा, विद्वेषः. **-er,** *s.* द्वेषिन् *m.*, विद्वेष्टृ *m.*

**Dethrone,** *v. t.* राज्याद् भ्रंश् c. or च्यु c. or अवपत् c. or अवरुह् c. (रोपयति). **-ment,** *s.* राज्यभ्रंशः-च्युति *f.*

**Detonate,** *v. i.* सहसा स्तन् 1 P or ध्वन् 1 P. **-ion,** *s.* स्तनितं, आकस्मिकध्वनि *m.*

**Detort,** *See* **Pervert.**

**Detract,** *v.* अपकृष्-अपनी 1 P. **2** अपलप् 1 P, अपवद्-भाष् 1 A, अधिक्षिप् 6 P, निंद् 1 P, असूयति (D.) (with dat.); मूल्यं न्यूनीकृ 8 U; लघूकृ; *See* **Depreciate. -ion,** *s.* अपकर्षः, लघूकरणं, ह्रासः. **2** असूया, अप-परि-वादः, आक्षेपः, गुणनिंदा, पैशून्यं, परदोषाविष्करणं, मात्सर्यं. **-or,** *s.* अपवादकः, अधिक्षेपकः, निंदकः, असूयकः, परिवादरतः. **-ory,** *a.* अपवादिन्, निंदक, अभ्यसूयक; पिशुन.

**Detriment,** *s.* हानि *f.*, अपकारः, क्षति *f.*, नाशः, अपायः, बाधा, विरोधः. **-al,** *a.* हानिकर (री *f.*), विरोधिन्, अपायकारक.

**Detrude,** *v. t.* अवपत् c, अधः क्षिप् 6 P, भ्रंश् c. **-Detrusion,** *s.* अवपातनं.

**Detruncate,** *v. t.* अवच्छिद् 7 P, निकृत् 6 P, वि-लू 9 U. **-ion,** *s.* अवच्छेदः, निकर्तनं.

**Deuce,** *s.* द्वयं, द्विकं. **2** पिशाचः, भूतः.

**Devastate,** *v. t.* उच्छिद् 7 P, उत्-अव-सद् c.; उपपीड् 10, वि-उप-प्लु 1 A, प्रबाध् 1 A, निर्जनीकृ 8 U. **-ion,** *s.* उच्छेदः, उपप्लवः, प्रबाधनं, विनाशः, निर्जनीकरणं.

**Develop,** *v. t.* पुष् 1, 4, 9 P, प्र-उप-चि 5 U, प्र-सं-वृध् c.; 'she d. ed her lovely limbs' पुपोष लावण्यमयान् विशेषान् (K. I. 25); also प्रचीयमानावयवा R. III. 7) उपचितांगी. **2** विकस् c., विस्तृ c., उद्भिद् c.: तस्य (कार्यापेक्षस्य) विस्तारमिच्छन् (Mu. 4) 'wishing to d. it.' **-v. i.** प्र-उप-चि pass., उद्भिद् pass., क्रमशः विकस् 1 P, क्रमेण प्र-सं-वृध् 1 A. **-ment,** *s.* प्रचयः, उपचयः, संवर्धनं; विस्तारः, विकासः, उद्भेदः.

**Devergence,** *See* **Divergence.**

**Deviate,** *v. i.* अति-व्यति-इ 2 P, अतिक्रम् 1 U, 4 P, अति-व्यभि-चर् 1 P; 'did not d. even an inch from the beaten path' क्षुण्णाद्वर्त्मनो रेखामात्रमपि न व्यतीयुः (R. I. 17); अप-या-इ 2 P, चल् 1 P, प्र-वि-°; च्यु 1 A, भ्रंश् 4 P, 1 A, (with abl.). **-ion,** *s.* अतिक्रमः, विचलनं, च्युति *f.*, भ्रेषः, भ्रंशः, व्यभिचारः, त्यागः; 'd. from the right path' उत्पथयानं, विमार्गगमनं.

**Device,** *s.* उपायः, युक्ति *f.*, प्रयोगः, कल्पना, साधनं. **2** अप-व्यप-देशः, छलं, माया, छद्मन् *n.*, कैतवं, व्याजः. **3** लक्षणं, चिह्नं, अंकः. **4** निर्माणशक्ति *f.*, कल्पनाचातुर्यं.

**Devil,** *s.* भूतः, वेतालः, पिशाचः; 'I shall not raise a d. for my own destruction' नाहमात्मविनाशाय वेतालोत्थापनं करिष्यामि.

**Devious,** *a.* वक्र, कुटिल, जिह्म. **2** मर्यादातिक्रामिन्, व्यभिचारिन्.

**Devise,** *v.* चिंत् 10, उप-सं-क्लृप् c., निरूप् 10, युज् 7 U, 10, आ-पर्या-लोच् 10, घट् c. **2** इच्छापत्रेण प्रदा 3 U. **-s.** इच्छापत्रेण रिक्थदानं. **-er,** *s.* धनाधिकारिन्, *m.* **-er,** *s.* उपायज्ञः, परिकल्पकः, प्रयोजकः.

**Devoid,** (of), *a. See* **Destitute** (of).

**Devoir,** *s.* स्वकर्तव्यं, कर्तव्यता, धर्मः. **2** सत्कारः, आदरः, पूजा, संमानः.

**Devolve,** *v. t.* निक्षिप् 6 P, न्यस् 4 P, संक्रम् c., सम्-ऋ c. (अर्पयति), आरुह् (रोपयति) 'having d. ed their property upon their sons' पुत्रसंक्रांतलक्ष्मीकाः (U. 1); गुणवत्सुतरोपितश्रियः (R. VIII. 11). **2** प्रपत् c., प्रसृ-प्रवह् c. **-v. i.** आगम् 1 P, आया 2 P, पत् 1 P, संक्रम् 1 U, 4 P; न्यस्-निक्षिप्-समृ c. pass.; 'after his death the kingdom d. ed upon his eldest son' मृते तस्मिंस्तस्य ज्येष्ठपुत्रो राजपदभाग्बभूव. **2** अधः पत् 1 P, अवपत्. **-Devolution,** *s.* निक्षेपणं, समर्पणं, संक्रामणं.

**Devote,** *v. t.* प्र-विनि-युज् 7 A, 10, सम्-ऋ c. (अर्पयति), निक्षिप् 6 P, उत्सृज् 6 P, सं-उप-क्लृप् c. **2** (Oneself to) आसंज्-अनुरंज्-pass., मनः युज् or बंध् 9 P or अभिनिविश् c., आसक्त-अभिनिविष्ट *a.* भू (all with loc.); भज् 1 U, आसेव् 1 A. **3** नाशाय क्लृप् c; *See* **Doom. -ed,** *a.* सक्त, आ-प्र-व्या-सक्त; नि-, रत, अभिनिविष्ट, समाहित, पर-तत्पर-परायण in comp. **2** भक्त, दृढभक्ति, अनुरक्त, अनुरागिन्; 'd. to the king' राजनिष्ठ, नृपासक्तचित्त; 'a d. wife' एकपत्नी, पतिव्रता, साध्वी, सती, 'a d. husband' भार्यानिरतः, पत्नीसेविन् *m.* 'a d. friend' स्थिरप्रेम मित्रं, रूढसख्यः सुहृद्. **-edly,** *adv* चित्तैकाग्रतया, भक्त्या, निष्ठया, अभिनिविष्टं, मनोभिनिवेशेन, मनोयोगेन, सुसमाहितं. **-edness,** *s* आसक्ति *f.*, भक्ति *f.*, अभिनिवेशः, परायणता. **-ee,** *s.* तापसः, यतिः, योगिन् *m.*, तपस्विन् *m.*, मुनिः, व्रतिन् *m.* **2** भक्तजनः, प्रणयिजनः:. उपासकः, भक्तः. **-ion,** *s.* अभियोगः, अभिनिवेशः, अनुरागः

Institute of Indology & Tamil Studies Cologne University Germany 9/1/2007